उ॰ नि॰ २

कांचनाः पर्योपपन्नचातुर्वर्ण्यं भैक्षाचर्यं चरंत आत्मानं मोहयंत आत्मानं मोहयंत इति चतुर्थः
खंडः ॥ इत्यथर्ववेदे आश्रमोपनिषत्समाप्तम् ॥ अकारो दक्षिणः पक्षः उकारस्तूत्तरः स्मृतः मका
रं तस्य पुच्छं वा अर्धमात्रा शिरस्तथा पादो जगत्समस्तस्य शरीरं सत्वमुच्यते धर्मश्च दक्षिणं चक्षुरध
र्मोऽथोत्तरं स्मृतं भूर्लोकः पादयोस्तस्य भुवर्लोकस्तु जानुनोः स्वर्लोकः कटिदेशेतु नाभिदेशे मह
र्जगत् जनोलोकस्तु हृदये कंठदेशे तपस्तथा भ्रुवोर्ललाटमध्ये तु सत्यलोको व्यवस्थितः सहस्रा
र्णमिति चात्र मंत्र एव प्रदर्शितः एवमेनं समारूढो हंसयोगविचक्षणः न बध्यते कर्मचारैः पापकोटि
शतैरपि आग्नेयी प्रथमा मात्रा वायव्येषा वरुणान्वयाः भानुमंडलसंकाशा भवेन्मात्रा तथोत्तरा
परमा चार्द्धमात्रा च वारुणीं तां विदुर्बुधाः कालत्रये [illegible] पान नावापिता सा मात्रा प्रतिष्ठिता एष ओंका
र आख्यातो धारणाभिर्निबोधत घोषिणी प्रथमा मात्रा विद्युन्माली तथापरा पतंगी च तृतीया स्या
च्चतुर्थी वायुवेगिनी पंचमी नामधेया च षष्ठी चैंद्री विधीयते सप्तमी वैष्णवी नाम शांकरी चैव त- एम
थाष्टमी नवमी महती नाम धृतिस्तु दशमी स्मृता एकादशी भवेन्मौनी ब्राह्मी तु द्वादशी मता २

नृपाश्चेति तत्र वैखानसा अकृष्टपच्यौषधिवनस्पतिभिर्ग्रामबहिष्कृताभिरग्निपरिचरणं कृत्वा पंचमहायज्ञ
क्रियां निर्वर्त्तयंत आत्मानं प्रार्थयंते वालखिल्यजटाधराश्चीरवल्कलपरिवृताः कार्त्तिक्यां पौर्णमास्यां
पुष्पफलमुत्सृजंतः शेषानष्टौ मासान् वृत्त्युपार्जनं कृत्वाग्निपरिचरणं कृत्वा पंचमहायज्ञक्रियां निर्वर्त्तयं
त आत्मानं प्रार्थयंते फेनपा उन्मादकाः शीर्णपर्णफलभोजिनो यत्र तत्र वसंतोग्निपरिचरणं कृत्वा पंचम
हायज्ञक्रियां निर्वर्त्तयंत आत्मानं प्रार्थयंते ३ परिव्राजका अपि चतुर्विधा भवंति कुटीचरा बहूदका हंसाः
परमहंसाश्चेति तत्र कुटीचराः स्वपुत्रगृहेषु भिक्षाचर्यं चरंत आत्मानं प्रार्थयंते बहूदकास्त्रिदंडकमंडलु
शिक्यपूतजलपवित्रपात्रपादुकासनशिखायज्ञोपवीतकौपीनकाषायवेषधारिणः साधुवृत्तेषु ब्रा
ह्मणकुलेषु भैक्षाचर्यं चरंत आत्मानं प्रार्थयंते ४ हंसा एकदंडधारिणः शिखावर्जिता यज्ञोपवीतधारि
णः शिक्यकमंडलुहस्ता ग्रामैकरात्रवासिनो नगरे तीर्थेषु पंचरात्रं वसंत एकरात्रद्विरात्रकृच्छ्रचांद्राय
णादि चरंत आत्मानं प्रार्थयंते परमहंसा नदंडधरा मुंडाः कंथाकौपीनवाससो व्यक्तलिंगा अव्यक्ताचा
रा अनुन्मत्ता उन्मत्तवदाचरंतस्त्रिदंडकमंडलुशिक्यपूतजलपवित्रपात्रपादुकासनशिखायज्ञोपवी
तानां त्यागिनः शून्यागारदेवगृहवासिनो न तेषां धर्मो नाधर्मो न चानृतं सर्वसहाः सर्वसमाः समलोष्टाश्म